# chaNDIkavacham

# ચણ્ડીકવચમ્

## Document Information

Text title : chaNDiikavacham

File name : chaNDiikavacham.itx

Category : kavacha, devii, durgA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : vArAhapurANe, Gitapress saptashati, also Mantra Maharnava Khemraj - 1924, Pdf file no - 5 , page no 95

Latest update : May, 15, 2006, February 3, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# ચણ્ડીકવચમ્

શ્રીગણેશાય નમઃ ।
અસ્ય શ્રીચણ્ડીકવચસ્ય બ્રહ્મા ઋષિઃ , અનુષ્ટુપ્ છન્દઃ ,
ચામુણ્ડા દેવતા , અઙ્ગન્યાસોક્તમાતરો બીજમ્ ,
દિગ્બન્ધદેવતાસ્તત્ત્વમ્ , શ્રીજગદમ્બાપ્રીત્યર્થે જપે વિનિયોગઃ ।
ૐ નમશ્ચણ્ડિકાયૈ ।
ૐ માર્કણ્ડેય ઉવાચ ।
ૐ યદ્ગુહ્યં પરમં લોકે સર્વરક્ષાકરં નૃણામ્ ।
યન્ન કસ્યચિદાખ્યાતં તન્મે બ્રૂહિ પિતામહ ॥ ૧॥

બ્રહ્મોવાચ ।
અસ્તિ ગુહ્યતમં વિપ્ર સર્વભૂતોપકારકમ્ ।
દેવ્યાસ્તુ કવચં પુણ્યં તચ્છૃણુષ્વ મહામુને ॥ ૨॥

પ્રથમં શૈલપુત્રીતિ દ્વિતીયં બ્રહ્મચારિણી ।
તૃતીયં ચન્દ્રઘણ્ટેતિ કૂષ્માણ્ડેતિ ચતુર્થકમ્ ॥ ૩॥

પઞ્ચમં સ્કન્દમાતેતિ ષષ્ઠં કાત્યાયનીતિ ચ ।
સપ્તમં કાલરાત્રિશ્ચ મહાગૌરીતિ ચાષ્ટમમ્ ॥ ૪॥

નવમં સિદ્ધિદાત્રી ચ નવદુર્ગાઃ પ્રકીર્તિતાઃ ।
ઉક્તાન્યેતાનિ નામાનિ બ્રહ્મણૈવ મહાત્મના ॥ ૫॥

અગ્નિના દહ્યમાનસ્તુ શત્રુમધ્યે ગતો રણે ।
વિષમે દુર્ગે ચૈવ ભયાર્તાઃ શરણં ગતાઃ ॥ ૬॥

ન તેષાં જાયતે કિઞ્ચિદશુભં રણસઙ્કટે ।
નાપદં તસ્ય પશ્યામિ શોકદુઃખભયં નહિ ॥ ૭॥

યૈસ્તુ ભક્ત્યા સ્મૃતા નૂનં તેષાં સિદ્ધિઃ પ્રજાયતે ।
યે ત્વાં સ્મરન્તિ દેવેશિ રક્ષસે તાન્ન સંશયઃ । ૮॥

પ્રેતસંસ્થા તુ ચામુણ્ડા વારાહી મહિષાસના ।
ઐન્દ્રી ગજસમારુઢા વૈષ્ણવી ગરુડાસના ॥ ૯॥

માહેશ્વરી વૃષારુઢા કૌમારી શિખિવાહના ।
લક્ષ્મીઃ પદ્માસના દેવી પદ્મહસ્તા હરિપ્રિયા ॥ ૧૦॥

શ્વેતરૂપધરા દેવી ઈશ્વરી વૃષવાહના ।
બ્રાહ્મી હંસસમારુઢા સર્વાભરણભૂષિતા ॥ ૧૧॥

ઇત્યેતા માતરઃ સર્વાઃ સર્વયોગસમન્વિતાઃ ।
નાનાભરણશોભાઢ્યા નાનારત્નોપશોભિતા ॥ ૧૨॥

દૃશ્યન્તે રથમારુઢા દેવ્યઃ ક્રોધસમાકુલાઃ ।
શઙ્ખં ચક્રં ગદાં શક્તિં હલં ચ મુસલાયુધમ્ ॥ ૧૩॥

ખેટકં તોમરં ચૈવ પરશું પાશમેવ ચ ।
કુન્તાયુધં ત્રિશૂલં ચ શાર્ઙ્ગમાયુધમુત્તમમ્ ॥ ૧૪॥

દૈત્યાનાં દેહનાશાય ભક્તાનામભયાય ચ ।
ધારયન્ત્યાયુધાનીત્થં દેવાનાં ચ હિતાય વૈ ॥ ૧૫॥

નમસ્તેઽસ્તુ મહારૌદ્રે મહાઘોરપરાક્રમે ।
મહાબલે મહોત્સાહે મહાભયવિનાશિની ॥ ૧૬॥

ત્રાહિ માં દેવિ દુષ્પ્રેક્ષ્યે શત્રૂણાં ભયવર્ધિનિ ।
પ્રાચ્યાં રક્ષતુ મામૈન્દ્રી આગ્નેયામગ્નિદેવતા ॥ ૧૭॥

દક્ષિણેઽવતુ વારાહી નૈરૃત્યાં ખડ્ગધારિણી ।
પ્રતીચ્યાં વારુણી રક્ષેદ્વાયવ્યાં મૃગવાહિની ॥ ૧૮॥

ઉદીચ્યાં રક્ષ કૌબેરિ ઈશાન્યાં શૂલધારિણી ।
ઊર્ધ્વં બ્રહ્માણી મે રક્ષેદધસ્તાદ્વૈષ્ણવી તથા ॥ ૧૯॥

એવં દશ દિશો રક્ષેચ્ચામુણ્ડા શવવાહના ।
જયા મે અગ્રતઃ સ્થાતુ વિજયા સ્થાતુ પૃષ્ઠતઃ ॥ ૨૦॥

અજિતા વામપાર્શ્વે તુ દક્ષિણે ચાપરાજિતા ।
શિખાં મે દ્યોતિની રક્ષેદુમા મૂર્ધ્નિ વ્યવસ્થિતા ॥ ૨૧॥

માલાધરી લલાટે ચ ભ્રુવૌ રક્ષેદ્યશસ્વિની ।
ત્રિનેત્રા ચ ભ્રુવોર્મધ્યે યમઘણ્ટા ચ નાસિકે ॥ ૨૨॥

શઙ્ખિની ચક્ષુષોર્મધ્યે શ્રોત્રયોર્દ્વારવાસિની ।
કપોલૌ કાલિકા રક્ષેત્કર્ણમૂલે તુ શાઙ્કરી ॥ ૨૩॥

નાસિકાયાં સુગન્ધા ચ ઉત્તરોષ્ઠે ચ ચર્ચિકા ।
અધરે ચામૃતકલા જિહ્વાયાં ચ સરસ્વતી ॥ ૨૪॥

દન્તાન્ રક્ષતુ કૌમારી કણ્ઠમધ્યે તુ ચણ્ડિકા ।
ઘણ્ટિકાં ચિત્રઘણ્ટા ચ મહામાયા ચ તાલુકે ॥ ૨૫॥

કામાક્ષી ચિબુકં રક્ષેદ્વાચં મે સર્વમઙ્ગલા ।
ગ્રીવાયાં ભદ્રકાલી ચ પૃષ્ઠવંશે ધનુર્ધરી ॥ ૨૬॥

નીલગ્રીવા બહિઃકણ્ઠે નલિકાં નલકૂબરી ।
સ્કન્ધયોઃ ખડ્ગિની રક્ષેદ્ બાહૂ મે વજ્રધારિણી ॥ ૨૭॥ ખડ્ગધારિણ્યુભૌ સ્કન્ધૌ

હસ્તયોર્દણ્ડિની રક્ષેદમ્બિકા ચાઙ્ગુલીસ્તથા ।
નખાઞ્છૂલેશ્વરી રક્ષેત્ કુક્ષૌ રક્ષેન્નલેશ્વરી ॥ ૨૮॥

સ્તનૌ રક્ષેન્મહાલક્ષ્મીર્મનઃશોકવિનાશિની ।
હૃદયે લલિતાદેવી ઉદરે શૂલધારિણી ॥ ૨૯॥

નાભૌ ચ કામિની રક્ષેદ્ગુહ્યં ગુહ્યેશ્વરી તથા ।
પૂતના કામિકા મેઢ્રં ગુદે મહિષવાહિની ॥ ૩૦॥ ભૂતનાથા ચ મેઢ્રં ચ

કટ્યાં ભગવતી રક્ષેજ્જાનુની વિન્ધ્યવાસિની ।
જઙ્ઘે મહાબલા પ્રોક્તા સર્વકામપ્રદાયિની ॥ ૩૧॥

ગુલ્ફયોર્નારસિંહી ચ પાદૌ ચામિતતેજસી ।
પાદાઙ્ગુલીઃ શ્રીર્મે રક્ષેત્પાદાધસ્તલવાસિની ॥ ૩૨॥

નખાન્દંષ્ટ્રાકરાલી ચ કેશાંશ્ચૈવોર્ધ્વકેશિની ।
રોમકૂપેષુ કૌબેરી ત્વચં વાગીશ્વરી તથા ॥ ૩૩॥

રક્તમજ્જાવમાંસાન્યસ્થિમેદાંસી પાર્વતી ।
અન્ત્રાણિ કાલરાત્રિશ્ચ પિત્તં ચ મુકુટેશ્વરી ॥ ૩૪॥

પદ્માવતી પદ્મકોશે કફે ચુડામણિસ્તથા ।
જ્વાલામુખી નખજ્વાલા અભેદ્યા સર્વસન્ધિષુ ॥ ૩૫॥

શુક્રં બ્રહ્માણી મે રક્ષેચ્છાયાં છત્રેશ્વરી તથા ।

અહઙ્કારં મનો બુદ્ધિં રક્ષ મે ધર્મચારિણિ ॥ ૩૬॥

પ્રાણાપાનૌ તથા વ્યાનં સમાનોદાનમેવ ચ ।
વજ્રહસ્તા ચ મે રક્ષેત્પ્રાણં કલ્યાણશોભના ॥ ૩૭॥

રસે રૂપે ચ ગન્ધે ચ શબ્દે સ્પર્શે ચ યોગિની ।
સત્ત્વં રજસ્તમશ્ચૈવ રક્ષેન્નારાયણી સદા ॥ ૩૮॥

આયૂ રક્ષતુ વારાહી ધર્મં રક્ષતુ વૈષ્ણવી ।
યશઃ કીર્તિં ચ લક્ષ્મીં ચ ધનં વિદ્યાં ચ ચક્રિણી ॥ ૩૯॥

ગોત્રમિન્દ્રાણી મે રક્ષેત્પશૂન્મે રક્ષ ચણ્ડિકે ।
પુત્રાન્ રક્ષેન્મહાલક્ષ્મીર્ભાર્યાં રક્ષતુ ભૈરવી ॥ ૪૦॥

પન્થાનં સુપથા રક્ષેન્માર્ગં ક્ષેમકરી તથા ।
રાજદ્વારે મહાલક્ષ્મીર્વિજયા સર્વતઃ સ્થિતા ॥ ૪૧॥

રક્ષાહીનં તુ યત્સ્થાનં વર્જિતં કવચેન તુ ।
તત્સર્વં રક્ષ મે દેવિ જયન્તી પાપનાશિની ॥ ૪૨॥

પદમેકં ન ગચ્છેત્તુ યદીચ્છેચ્છુભમાત્મનઃ ।
કવચેનાવૃતો નિત્યં યત્ર યત્રાધિગચ્છતિ ॥ ૪૩॥

તત્ર તત્રાર્થ લાભશ્ચ વિજયઃ સાર્વકામિકઃ ।
યં યં કામયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ।
પરમૈશ્વર્યમતુલં પ્રાપ્સ્યતે ભૂતલે પુમાન્ ॥ ૪૪॥

નિર્ભયો જાયતે મર્ત્યઃ સઙ્ગ્રામેષ્વ પરાજિતઃ ।
ત્રૈલોક્યે તુ ભવેત્પૂજ્યઃ કવચેનાવૃતઃ પુમાન્ ॥ ૪૫॥

ઇદં તુ દેવ્યાઃ કવચં દેવાનામપિ દુર્લભમ્ ।
યઃ પઠેત્પ્રયતો નિત્યં ત્રિસન્ધ્યં શ્રદ્ધયાન્વિતઃ ॥ ૪૬॥

દૈવી કલા ભવેત્તસ્ય ત્રૈલોકેષ્વ પરાજિતઃ ।
જીવેદ્વર્ષશતં સાગ્રમપમૃત્યુ વિવર્જિતઃ ॥ ૪૭॥

નશ્યન્તિ વ્યાધયઃ સર્વે લૂતાવિસ્ફોટકાદયઃ ।
સ્થાવરં જઙ્ગમં વાપિ કૃત્રિમં ચાપિ યદ્વિષમ્ ॥ ૪૮॥

અભિચારાણિ સર્વાણિ મન્ત્રયન્ત્રાણિ ભૂતલે ।
ભૂચરાઃ ખેચરાશ્ચૈવ જલજાશ્ચોપદેશિકાઃ ॥ ૪૯॥

સહજાઃ કુલજા માલાઃ શાકિની ડાકિની તથા ।
અન્તરિક્ષચરા ઘોરા ડાકિન્યશ્ચ મહાબલાઃ ॥ ૫૦॥

ગ્રહભૂતપિશાચાશ્ચ યક્ષગન્ધર્વરાક્ષસાઃ ।
બ્રહ્મરાક્ષસવેતાલાઃ કૂષ્માણ્ડા ભૈરવાદયઃ ॥ ૫૧॥

નશ્યન્તિ દર્શનાત્તસ્ય કવચે હૃદિ સંસ્થિતે ।
માનોન્નતિર્ભવેદ્રાજ્ઞસ્તેજોવૃદ્ધિકરં પરમ્ ॥ ૫૨॥

યશસા વર્ધતે સોઽપિ કીર્તિમણ્ડિતભૂતલે ।
જપેત્સપ્તશતીં ચણ્ડીં કૃત્વા તુ કવચં પુરા ॥ ૫૩॥

યાવદ્ભૂમણ્ડલં ધત્તે સશૈલવનકાનનમ્ ।
તાવત્તિષ્ઠતિ મેદિન્યાં સન્તતિઃ પુત્રપૌત્રકી ॥ ૫૪॥

દેહાન્તે પરમં સ્થાનં યત્સુરૈરપિ દુર્લભમ્ ।
પ્રાપ્નોતિ પુરુષો નિત્યં મહામાયાપ્રસાદતઃ ॥ ૫૫॥

લભતે પરમં રૂપં શિવેન સહ મોદતે ॥ ૫૬॥

॥ ઇતિ શ્રીવારાહપુરાણે હરિહરબ્રહ્મવિરચિતં દેવ્યાઃ કવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com, NA

*chaNDIkavacham*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*